# पुराणम्

०३

# नारदपुराणम्

- नारदपुराणं अष्टादशपुराणेषु अन्यतमं वर्तते । इदं किञ्चन प्राचीनं पुराणम् । पुराणस्य पञ्च अपि लक्षणानि अत्र दृश्यन्ते। नारदीयपुराणे ९७ अध्याये नारदपुराणस्य लक्षणम् उक्तमस्ति। तद्यथा,

  श्रृणु विप्र ! प्रवक्ष्यामि पुराणं नारदीयकम्।
  पञ्चविंशतिसाहस्रं बृहत्कल्पकथाश्रयम्॥ इति।

- **रचनाकालः** - बृहन्नारादीयस्य पुराणस्य नारदपुरणस्य च अतीव सामीप्यमस्ति। अस्य पुराणस्य रचना कालः ८५० तः ९५० शतकम् इति।

- **अन्तर्विषयाः** - **“नारदोक्तं पुराणन्तु नारदीयं प्रचक्षते।“** नारदपुरणं विभागद्वये विभक्तम् अस्ति। उत्तरखण्डः तथा पूर्वखण्डश्च इति। पूर्वभागे चत्वारः पादाः सन्ति। १२५ अध्यायाः सन्ति। एवं उत्तरभागे ८२ अध्यायाः सन्ति। २२,००० सहस्र श्लोकाः अस्मिन् पुराणे सन्ति। नारदपुराणं वैष्णवपुराणं भवति। अस्मिन् पुराणे वैष्णवसम्प्रदायस्य अनुष्ठानपद्धतिः वर्णितः अस्ति। पूर्वभागे वर्णाश्रमधर्माणां निरूपणं कृतं दृश्यते। आश्रमाणां आचारविचाराश्च निरुपितम् अस्ति। श्राद्धकर्म, एवं प्रायश्चित्तादीनां विशेषनिरूपितम् अस्ति। एवम् अतिरिक्ततया व्याकरणम्, निरुक्तम् तथा छन्दःशास्त्रादीनां विवरणम् अस्मिन् पुराणे लभ्यते। अस्मिन् पुराणे रामस्य, कृष्णस्य, विष्णोः,काल्याः, हनूमतः शिवस्य च विवरणानि समन्त्रपूर्वकं लभ्यन्ते। अस्य पुराणस्य वैशिष्ठ्यं किम् इति चेत्, १८ पुराणानां विषयानुक्रमणिका विस्तृतरूपेण विद्यते अस्मिन् पुराणे। अनेन संक्षेपेण १८ पुराणानां ज्ञानं प्राप्तुं शक्यते। कार्तिकमाहात्म्यम्, पार्थिवलिङ्गमाहात्म्यम्, दत्तात्रेयस्तोत्रम्, सङ्कटगणपतिस्तोत्रम्, श्रीकृष्णमाहात्म्यम्, यादवगिरिमाहात्म्यम्, मृगव्याधकाथाः इत्यादि अनेन पुराणेन उत्पनाः ग्रन्थाः भवन्ति।

# मार्कण्डेयपुराणम्

- मार्कण्डेयपुराणं प्राचीनतमपुराणेषु अन्यतमम्। पञ्च अपि पुराणलक्षणयुक्तं इदं ९००० श्लोकात्मकं ,१३८ अध्याययुक्तमस्ति। लोकप्रियपुराणं मार्कण्डेयऋषिः ब्रह्मणा प्राप्य क्रौष्ठिकाय प्रोक्तमिति कथ्यते। अस्मिन् पुराणे ऋग्वेदस्य अग्निः, इन्द्रः, सूर्यः इत्यादिदेवतानां विषये विवेचना कृता अस्ति। तथैव गृहस्थाश्रमस्य दिनचर्या, नित्यकर्मादीनां चर्चा अस्ति। भगवत्याः विस्तृतमहिमायाः परिचयदातरि अस्मिन् पुराणे दुर्गासप्तशत्याः कथाः एवं माहात्म्यं, हरिशचन्द्रस्य कथा, मदालसा-चरित्रम्, अत्रि-अनसूययोः कथा, दत्तात्रेय-चरित्रम् इत्यादीनाम् अनेक-सुन्दर- कथानां विस्तृत वर्णनम् अस्ति। तत्रापि महाविष्णु-सरस्वती-शङ्कर-देवी-सूर्यादीनां स्तुतिः बाहुल्येन दृश्यते।

  सत्येनार्कः प्रतपति सत्ये तिष्टति मेधिनी।

  सत्यं चोक्तम् परोधर्मः स्वर्गः सत्ये प्रतिष्टितः॥

  अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते॥

- इत्यादीनि सत्यप्रतिपादकानि वाक्यानि मार्कण्डेयपुराणस्य औन्नत्यं प्रदर्शयति। राजसपुराणे अस्मिन् विश्वस्य भक्ति-योग-दार्शनिक-भूस्वरूप-राजनीति-दण्डनीति-शैक्षणिकादीनि विषयादीनि सुष्टु निरूपितमस्ति।महाभारते संदिग्धेषु विषयेषु स्पष्टं उत्तरं दत्त्वा महाभारतस्य औचित्यं निर्मितमस्ति।एवं स्वयं मार्कण्डेयः एतत्पुराणद्वारा लोके धर्मं सम्स्थाप्य 'पुराणाचार्य' इत्येव नामं प्राप्तवान्।

# अग्निपुराणम्

- **अग्निपुराणम्** अष्टादशपुराणेषु अन्यतमम् । संस्कृतविश्वकोशेषु भजते प्रधानं स्थानम् । पुराणमिदमग्निनामकमपि संभाषणैरेव संघटितम् । तानि च सम्भाषणान्यग्निवसिष्ठयोः ।
- पुराणमिति शब्दाकर्णनमनु सृष्टिः प्रतिसृष्टिरित्यादि वस्तुपूगं किलानुसन्दधति विमर्शनविचक्षणाः । अत्रापि सर्गस्य (सृष्टेः)विचारः १७-२० एतेष्वध्यायेषु वर्तते । प्रतिसर्गस्य तु पुनः ३८३ संख्याङ्कितस्याध्यायस्याननन्तरम् । वांशो नाम राजीयानामथवा ऋषियाणां नाम्नां पट्टिका । मन्वन्तरो नाम शासनपरिपाटयां मनूनां कालिकं क्रमिकं च परिवर्त्तनम् । राजर्षिणां चरित्राण्येव वंशानुचरितपदाभिलप्यानि । कल्पमन्वन्तरवर्णनम् अग्निपुराणे बहुषु स्थलेष्वक्षिलक्षीक्रियते । विशेषतः १५० संख्याङ्कितेऽध्याये चतुर्दशमन्वन्तराणां वर्णनं वर्तते । वंशानुचरितं तु भूयोभूयः समायाति ।
- यदि केवलमेतावदभविष्यत्, पुराणमिदं भारतीयानां श्रध्दा-विश्वासभावनानां चिन्तनपरंपरायाश्च प्राचीनं लिखितसाक्ष्यं समभविष्यत् । विश्वकोशत्वरुपेणा धर्मेण महत्त्वमेतदीयम् । साहित्यशास्त्रम्, आयुर्वेदः, अश्वायुर्वेदः, गजायुर्वेदः, वृक्षायुर्वेदः, वास्तुविद्या, राजनीतिः, शस्त्रविद्या एतदादीनि वस्तूनि पर्याप्तमात्रयात्र विद्यते ।

# भविष्यपुराणम्

- **भविष्य पुराणं** अष्टादशसु महापुराणेषु अन्यतमम् अस्ति | 'भविष्यपुराणं विषयवस्तुदृष्ट्या वर्णनशैलीदृष्ट्या च अत्यन्तम् उच्चकोटिकं पुराणम् ।प्रायः १५०००श्लोकात्मकं इदं। अस्मिन् पुराणे धर्मः, सदाचारः, नीतिः, उपदेशः, व्रतानि, तीर्थानि, दानानि, ज्योतिश्शास्त्रम्, आयुर्वेदः लोकस्थितिः श्राद्धः इत्येते विषयाः वर्णिताः सन्ति । तत्रापि विशेषतः सूर्यस्य माहात्म्यं, सूर्योपासनचिन्तनं भविष्यपुराणस्य वैशिष्ट्यम्। तत्र च ब्राह्मपर्व-वैष्णवपर्व-शैवपर्व-सौरपर्व-प्रतिसर्गपर्वभेदेन भविष्यपुराणम् पञ्चधा विभक्तम्। यवनादिचरित्रं तस्य नामस्य सार्थक्यं प्राप्नोति।

- विकिपीडियातः संगृहीतः

धन्यवादः